* <u>काव्यप्रयोजनम्</u> :- प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति न्यायेन कस्मिन्नपि कर्मणि प्रवृत्तिः पूर्वमेव तस्य कर्मणः प्रयोजनं विचार्य भवति । अतः काव्यस्य पठने प्रणयने अथवा आस्वादने किं प्रयोजनं तद् यदि न ज्ञायते तर्हि न कस्यापि जनस्य काव्ये आग्रहः स्यात् । अतः काव्यस्य प्रयोजनं काव्य विधानात् पूर्वं वक्तव्यम् । यदुक्तम् —

"सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते ।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥"
इति ॥

एतदेव मनसि निधाय काव्यप्रकाशकारेण तदीयग्रन्थस्य प्रथम उल्लासे काव्यप्रयोजनं निरूप्यते —

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥
इति ॥

अयमर्थः लोकोत्तरवर्णनानि पुनस्वरूपस्य कवेर-साधारणं तादृक्वर्णनात्मकं लौकिकं कर्म काव्यं यशसे, अर्थकृते, व्यवहारविदे, शिवेतरक्षतये, सद्यपरनिर्वृतये, कान्तासम्मिततयोपदेशयुजे च भवति ।

काम यशसे :- कविकुलगुरु: कालिदास:
रघुवंश, कुमारसम्भव, शकुन्तला इत्यादीनि काव्याणि प्रणीय एव अतुलं यशो लभे। सम्प्रयुक्तं सुधारसातारकारेण न खलु कालि-दासस्य पित्रादिकुलं वा कश्चित् जानाति न वा दानादिकं किञ्चित् प्रसिद्धं येन तादृशं यश: स्यात्, किन्तु काव्यमेव तत्कारणम्, इति अधुनाऽपि काव्यैरचनेन जनाति बहव: कवय: साहित्यिका वा यशस्वीं लभते इति किमुवक्तव्यम्।

अर्थकृते :- काव्यरचनेन प्रचुरं धनमपि लब्धुं शक्यते। यथा धावकी नाम कवि: श्रीहर्षनृपानाम्ना रत्नावली नाटिकां विरच्य बहुधनं लेभे इति प्रसिद्धा वार्ता। अद्यापि दृश्यते यत् कविता उपन्यासकथासाहित्य प्रभृति रचनेन नाना जना: धनिन: भवति।

व्यवहारविदे :- काव्यव्यवहारविदे अर्थात् काव्यम् आचारज्ञानाय अपि जनानां सामर्थ्यं विदधाति। काव्यस्य अनुशीलनेन नृपसिसचिवादीनां पृथिवीपालनादि यथोचिताचारज्ञानस्य परिज्ञानं जायते।

शिवेतरक्षतये :- काव्यात् शिवेतरस्य अर्थात् अमङ्गलस्य विनाशोऽपि भवति । श्रूयते यत् पुरा 'मयूर' इति कवि कुष्ठरोगेण आक्रान्त आसीत् । स तु श्लोकशतेन भगवन्तं भास्कर-रदेवमुपश्लोक्य तस्य महिम्ना रोगान्मुक्तोऽ-भवत् ।

सद्यपरनिर्वृतये :- काव्यस्य तु मुख्यं प्रयोजनं सद्यपरनिवृत्तिरेव । काव्य श्रवणात् अनन्तरमेव सहृदये परनिवृत्तिः अर्थात् परमानन्दो जायते । अस्य काव्यफलस्य व्याख्याने प्रकाशकारो वदति "सकल प्रयोजन मौलि-भूतं समनन्तरमेव रसस्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्" इति मम्मटस्य-मतेन काव्येषु लभ्यमानेषु सकलेषु प्रयो-जनेषु इदमेव फलं मुख्यतमम् । इदं च फलं काव्यश्रवणादनन्तरमेव जायते न तु रामादिवत् प्रवर्तितव्यम् न रावणादिवत् इत्यादि वदितव्यम् ।

कान्तासम्मित तयोपदेशयुजे :- काव्यात् रामा-दिवत् प्रवर्तितव्यम् न रावणादिवत् इत्येवंरूप उपदेशोऽपि लभ्यते । ननु उपदेश पदानाय

नीतिशास्त्राणि सन्ति अतः काव्येन किम्, अत्रोच्यते भम्मटेन प्रभुसम्मितशास्त्रप्रधान वेदादिशास्त्रम्य, इत्यादि। अस्य अयमर्थः कार्याकार्यविभागाय सत्यैव अनेकानि शास्त्राणि। परन्तु काव्यं खलु तेभ्यः विलक्षणमेव। प्रभुसम्मितवेदादिशास्त्रेषु शब्दस्यैव प्रधान्यम् पुराणादिशास्त्रेषु मित्रसम्मितार्थस्यैव प्रधान्यम्। परन्तु एतेभ्यो विलक्षणेषु कान्तासम्मितकाव्येषु केवलं शब्दार्थयोः एव प्रधान्यं नास्ति, अपितु शृङ्गारादीनां रसानाम् उपायभूते व्यापारे विभावादिसंयोजनं भञ्जनं वा ततस्तया वाच्यवाचकयोः गौणत्वमेव जायते। अत्र च भञ्जनाप्रति पदस्य रसस्यैव प्रधान्यम्। कान्ताखलु दयितं (स्वामीनं) गुरुमित्राद्यधिनं। अपि इतरजनविलक्षण-तया स्वाभिमुखी कृत्वा स्वामिनं प्रवर्तयति। अनेन प्रकारेण काव्यमपि नीतिशास्त्र विमुखान् जनान् अथवा सहृदयान् शृङ्गारादिरसेनसदुपदेशं करोति इति भावः।

अनेन प्रकारेण प्रकाशकारेण काव्यस्य प्रयोजनालोचितं भवति।

५'

प्रर्यजिनमालोचि विसँ भावसि ।